# नवग्रहस्तोत्रम् navagraha- stotram

जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम्॥

तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्॥

japākusumasaṅkāśaṁ kāśyapeyaṁ mahādyutim||
tamo'riṁ sarvapāpaghnaṁ praṇato'smi divākaram||

दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम्।

नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम्॥

dadhiśaṅkhatuṣārābhaṁ kṣīrodārṇavasambhavam|
namāmi śaśinaṁ somaṁ śambhormukuṭabhūṣaṇam||

धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम्।

कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम्॥३

dharaṇīgarbhasambhūtaṁ vidyutkāntisamaprabham|
kumāraṁ śaktihastaṁ taṁ maṅgalaṁ praṇamāmyaham||3

प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम्।

सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम्॥ ४

priyaṅgukalikāśyāmaṁ rūpeṇāpratimaṁ budham|
saumyaṁ saumyaguṇopetaṁ taṁ budhaṁ praṇamāmyaham|| 4

देवानां च ऋषीणां च गुरुं काञ्चनसंनिभम्।

बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम्॥ ५

devānāṁ ca ṛṣīṇāṁ ca guruṁ kāñcanasannibham|
buddhibhūtaṁ trilokeśaṁ taṁ namāmi bṛhaspatim|| 5

हिमकुन्दमृणालाभं  दैत्यानां परमं गुरुम्।

सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्॥६

himakundamṛṇālābhaṁ  daityānāṁ paramaṁ gurum|
sarvaśāstrapravaktāraṁ bhārgavaṁ praṇamāmyaham||6

नीलाञ्जनसमाभासं  रविपुत्रं यमाग्रजम्।

छायामार्ताण्डसम्भूतं  तं नमामि शनैश्चरम्॥ ७

nīlāñjanasamābhāsaṁ  raviputraṁ yamāgrajam|
chāyāmārtāṇḍasambhūtaṁ  taṁ namāmi śanaiścaram|| 7

अर्धकायं महावीर्यं  चन्द्राादित्यविमर्दनम्।

सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम्॥ ८

ardhakāyaṁ mahāvīryaṁ  candrādityavimardanam|
siṁhikāgarbhasambhūtaṁ taṁ rāhuṁ praṇamāmyaham|| 8

पलाशपुष्पसंकाशं  तारकाग्रहमस्तकम्।

रौद्रं रौद्रात्मकं घोरं  तं केतुं प्रणमाम्यह ९

palāśapuṣpasaṅkāśaṁ  tārakāgrahamastakam|
raudraṁ raudrātmakaṁ ghoraṁ  taṁ ketuṁ praṇamāmyaham|| 9

इति व्यासनुखोद्गीतं यः पठेत् सुसमाहितः।

दिवा वा यदि वा रात्रौ   विघ्नशान्तिर्भविष्यति॥ १०

iti vyāsanukhodgītaṁ yaḥ paṭhet susamāhitaḥ|
divā vā yadi vā rātrau   vighnaśāntirbhaviṣyati|| 10

नरनारीनृपाणां च भवेद्दुःस्वप्ननाशनम्।

ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्धनम्॥ ११

naranārīnṛpāṇāṁ ca bhavedduḥsvapnanāśanam|
aiśvaryamatulaṁ teṣāmārogyaṁ puṣṭivardhanam|| 11

ग्रहनक्षत्रजाः  पीडास्तस्कराग्निसमुद्भवाः ।
ताः सर्वाः प्रशमं यान्ति  व्यासो ब्रूते न संशयः ॥ १२

grahanakṣa jāḥ  pīḍāstaskarāgnisamudbhavāḥ|
tāḥ sarvāḥ praśamaṁ yānti  vyāso brūte na saṁśayaḥ|| 12

**इति व्तासविरचितं नवग्रहस्तोत्रं संपूर्णम् ॥**

**iti vtāsaviracitaṁ navagrahastotraṁ sampūrṇam||**